# Chandrashekhara Ashtakam

# चन्द्रशेखराष्टकम्

## Document Information

Text title : chandrashekharAShTakaM from Shivarahasya

File name : chandra8.itx

Category : aShTaka, shiva, shivarahasya

Location : doc_shiva

Proofread by : NA, Ruma Dewan

Description-comments : Brihat Stotra Ratnakara, Shivarahasya Amsha 4, Adhyaya 14 (v22-37).

Latest update : August 13, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 7, 2024

*sanskritdocuments.org*

# चन्द्रशेखराष्टकम्

(शिवरहस्यान्तर्गते मार्कण्डेयकृतम्)

चन्द्रशेखर चन्द्रशेखर चन्द्रशेखर पाहि माम् ।
चन्द्रशेखर चन्द्रशेखर चन्द्रशेखर रक्ष माम् ॥

रत्नसानुशरासनं रजताद्रिशृङ्गनिकेतनं
शिञ्जिनीकृतपन्नगेश्वरमच्युतानलसायकम् । (सिञ्जिनी)
क्षिप्रदग्धपुरत्रयं त्रिदशालयैरभिवन्दितं (त्रिदिवालयैरभिवन्दितं)
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ १॥

पञ्चपादपपुष्पगन्धिपदाम्बुजद्वयशोभितं
भाललोचनजातपावकदग्धमन्मथविग्रहम् ।
भस्मदिग्धकलेवरं भवनाशनं भवमव्ययं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ २॥

मत्तवारणमुख्यचर्मकृतोत्तरीयमनोहरं
पङ्कजासनपद्मलोचनपूजिताङ्घ्रिसरोरुहम् ।
देवसिन्धुतरङ्गशीकरसिक्तशीतजटाधरं (तरङ्गसी, सिक्तशुभ्र)
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ३॥

कुण्डलीकृतकुण्डलीश्वरकुण्डलं वृषवाहनं (कुण्डलेश्वर)
नारदादिमुनीश्वरस्तुतवैभवं भुवनेश्वरम् ।
अन्धकान्तकमाश्रितामरपादपं शमनान्तकं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ४॥

यक्षराजसखं भगाक्षहरं भुजङ्गविभूषणं
शैलराजसुतापरिष्कृतचारुवामकलेवरम् ।
क्ष्वेडनीलगलं परश्वधधारिणं मृगधारिणं (क्ष्वेलनील)
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ५॥

भेषजं भवरोगिणामखिलापदामपहारिणं
    दक्षयज्ञविनाशनं त्रिगुणात्मकं त्रिविलोचनम् ।
भुक्तिमुक्तिफलप्रदं सकलाघसङ्घनिबर्हणं
    चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ६॥

भक्तवत्सलमर्चितं निधिमक्षयं हरिदम्बरं
    सर्वभूतपतिं परात्परमप्रमेयमनामयम् । (परात्परमप्रमेयमनुत्तमम्)
सोमवारिदभूहुताशनसोमपानिलखाकृतिं (सोमवारिन्, सोमवारिन) (भोहुताशन)
    चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ७॥

विश्वसृष्टिविधायिनं पुनरेव पालनतत्परं
    संहरन्तमथ प्रपञ्चमशेषलोकनिवासिनम् । (संहरन्तमपि)
क्रीडयन्तमहर्निशं गणनाथयूथसमाकुलं (गणनाथयूथसमन्वितं)
    चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ८॥

फलश्रुतिः -
मृत्युभीतमृकण्डसूनुकृतस्तवं शिवसन्निधौ
    यत्र कुत्र च यः पठेन्न हि तस्य मृत्युभयं भवेत् ।
दीर्घमायुररोगितामखिलार्थसम्पदमादरात् (पूर्णमायु, सम्पदमादरं)
    चन्द्रशेखर एव तस्य ददाति मुक्तिमयत्नतः ॥

॥ इति श्रीशिवरहस्यान्तर्गते शिवाख्ये मार्कण्डेयकृतं
    श्रीचन्द्रशेखराष्टकं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । शिवाख्यः चतुर्थांशः । अध्यायः १४
मार्कण्डेयतपः - कालनिग्रह - मार्कण्डेयवरप्रदानवर्णनम् । २२-३७+ ॥

- .. shrIshivarahasyam . shivAkhyaH chaturthAMshaH . adhyAyaH 14
mArkaNDeyatapaH - kAlanigraha - mArkaNDeyavarapradAnavarNanam . 22-37+ ..

Mārkaṇḍeya मार्कण्डेय beseeches Śiva Candraśekhara शिव चन्द्रशेखर to protect him from Yama यम who had appeared as the bearer of early death; and iterates the rhetoric, that since he is under the protection of Candraśekhara चन्द्रशेखर , what (harm) can Yama यम possibly do.

The shloka order and renumbering complies to the popular name of the composition.

*Chandrashekhara Ashtakam*

pdf was typeset on April 7, 2024

Please send corrections to *sanskrit@cheerful.com*